वाङ्मकुक्कुटः” याज्ञ० । “अश्मकुट्टो भवेद्वापि दन्तोलूखलिकोऽपि वा” मनुः । इनि । दन्तोलूखलीत्यप्यत्र ।

**दन्तौष्ठ** न० दन्ताश्च ओष्ठौ च तेषां समाहारः । दन्तौष्ठानां समाहारे । ततः शरीरावयवत्वात् भवादौ यत् । दन्त्योष्ठ्य तदुच्चार्य्ये दन्त्यवकारे “दन्तोष्ठ्योवः स्मृतो बुधैः” शिक्षा० ।

**दन्त्य** पु० दन्ते दन्तमूले वा भवः यत् । दन्तदन्तमूलयोर्जाते १तवर्गादौ वर्णे । “लृतुलसानां दन्ताः” सि० कौ० । “दन्त्या लृतुलसाः स्मृताः” पा० शि० । शेखरादौ दन्तशब्दस्य दन्तमूलपरतोक्ता अन्यथा भग्नदन्तस्य तदनुच्चारणापत्तेः” दन्तेभ्यो हितः यत् । २दन्तहितकारके त्रि० ।

**दन्त्यरिष्ट** न० दन्त्यम् अरिष्टं रिष्टाभावो यत्रौषधे । चक्रदत्तोक्ते अर्शोघ्ने औषधभेदे ।

“दन्ती चित्रकमूलानि जलद्रोणे विपाचयेत् । त्रिपलं त्रिफलायाश्च दलानां तत्र दापयेत् । तुलां गुडस्य तत्तिष्ठेन्मासार्द्धं घृतभाजने । तन्मात्रया पिबेन्नित्यमर्शोभ्यो विप्रमुच्यते । ग्रहणीपाण्डुरोगघ्नं वातवर्च्चोऽनुलोमनम् । दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः” ।

**दन्दशूक** पुंस्त्री गर्हितं दशति दन्श—गर्हार्थे यङ्—ऊक । १राक्षसे, “दन्दशूकान् जिघांसौ” भट्टिः २सरीसृपे, ३सर्पे च मेदि० । “दन्दशूकः पतङ्गो वा भवेत् कीटोऽथवा कृमिः” याज्ञ० ।

**दन्द्रम्यमाण** त्रि० द्रम—यङ् शानच् । कुटिलगतियुक्ते ।

**दन्भ** दम्भे स्वा० पर० अक० सेट् । दभ्नोति अदम्भीत् । दम्भित्वा दब्ध्वा । दब्धः । सनि वेट् इडभावपक्षे नलोपे धीप्सति धिप्सति दिदम्भिषति ।

**दन्भ** संघाते चुरा० आत्म० अक० सेट् । दम्भयते अददम्भत ।

**दन्श** हिंसने रदकरणकव्यापारभेदे दंशने (कामड़ान) भ्वा० पर० सक० अनिट् । दशति अदाङ्क्षीत् ददंश । “करौ निरोद्धुं दशति स्म केवलम्” “कटुकीटान् दशतः सतः क्वचित्” नैष० । दष्टः दंष्ट्रा ।

**दभ** प्रेरणे चु० उभ० सक० सेट् इदित् । दम्भयति ते अददम्भत् त ।

**दभ्र** न० दन्भ—रक् । १अल्पे २तद्वति त्रि० अमरः ३समुद्रे पु० उणा० “अदभ्रदर्भामधिशय्य स स्थलीम्” किरा० । ४उत्तरस्यां दिशि स्त्री निघण्टुः । “अ सिदभ्रस्य चिद्वृधः” ऋ० १।८१।२।

**दम्** अव्य० दम—विच् । कलत्रे शब्दार्थचि० ।

**दम** शमे दण्डे च दिवा० शमा० अक० सेट् । दाम्यति अदमत्-अदमीत् ददाम देमतुः । णिच् दमयति ते अदिदमत् त टित् दमथुः दमितः दान्तः । उदित् दमित्वा दान्त्वा । “यमो दाम्यति राक्षसान्” “जानुभ्यामदमच्चान्यान्” “दमित्वाप्यरिसंघातान्” “अदान्तां स्त्रिदशैरपि” भट्टिः । दमः दम्यः दमनः ।

**दम** पु० दम—भावे घञ् । १दण्डे, २बाह्येन्द्रियाणां स्वस्वविषयेभ्यो निवर्त्तने, “निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते” इत्युक्ते बाह्येन्द्रियव्यापाररोधे, विकारहेतुसन्निधानेऽपि ३मनसः स्थैर्य्ये, “कुत्सितात् कर्म्मणो विप्र ! यच्च चित्तनिवारणम् । स कीर्त्तितो दम” इत्युक्ते ४कुकर्मभ्यो मनसो निवारणे, ५कर्दमे, मेदि० ६दमने च । ६भीमन्टपपुत्रभेदे दमयन्तीशब्दे दृश्यम् । ७विष्णौ पु० दमयितृशब्दे दृश्यम् ।

**दमघोष** पु० श्रुतश्रवोऽपरनामके शिशुपालपितरि राजभेदे “ततः संजनयामास सुप्रभे द्वे च दारिके । कुन्तीञ्च पाण्डोर्महिषीं देवतामिव भूचराम् । भार्य्याञ्च दमघोषस्य चेदिराजस्य सुप्रभाम्” हरिवं० ९५ अ० ।

**दमघोषज** पु० दमघोषात् जायते जन—ड । शिशुपाले “सुदमो दमघोषजः” माघः ।

**दमघोषसुत** पु० ६त० । शिशुपाले “दमघोषसुतो वीरः शिशुपालो महामतिः” भा० आ० १८७ अ० दमघोषतनयादयोऽप्यत्र । [क्लेशसहने च ।

**दमथ** पु० दम—भावे उणा० अथच् । १दण्डे २तपः-

**दमथु** पु० दम—भावे अथु । १दमे दमने अमरः ।

**दमन** न० दम—भावे ल्युट् । १दण्डे २इन्द्रियादीनां बाह्यवृत्तिनिरोधे । कर्त्तरि अच् । (दोना) ख्याते ३पुष्पचामरे पुष्पप्रधाने वृक्षभेदे “दमनस्तु रसे तिक्तो हृद्यो वृष्यः सुगन्धिकः । ग्रहणीविषकुष्ठास्रक्लेदकण्डूत्रिदोषजित्” भावप्र० । दमनारोपणोत्सवस्य नि० सि० उक्तो यथा “चैत्रशुक्लद्वादश्यां दमनोत्सवः “द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः । बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति” रामार्चनचन्द्रिकोक्तेः “ऊर्ज्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् । चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः” इति तत्रैव पाद्मवचनाच्च । शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्य्यः “तत्र स्यात् स्वीयतिथिषु वह्न्यादेर्दमनार्पणम्” इति तत्रैवोक्तेः । ज्योतिःप्रकाशेऽपि “स्वस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा । पवित्रदमनारोपे ग्राह्या तत्तत्तिथिर्बुधैः” । तिथयस्तु “वह्निर्विरिञ्चिर्गिरिजा गणेशः